# ॥ તુલસ્યષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

.. tulasyaShTottarashatanAmastotram ..

sanskritdocuments.org

August 29, 2017

# .. tulasyaShTottarashatanAmastotram ..

# ॥ તુલસ્યષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : tulasyaShTottarashatanAmastotram

File name : tulasyaShTottarashatanAmastotram.itx

Category : aShTottarashatanAma

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar, PSA Easwaran

Latest update : August 28, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 29, 2017

*sanskritdocuments.org*

# ॥ તુલસ્યષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

તુલસી પાવની પૂજ્યા વૃન્દાવનનિવાસિની ।
જ્ઞાનદાત્રી જ્ઞાનમયી નિર્મલા સર્વપૂજિતા ॥ ૧॥

સતી પતિવ્રતા વૃન્દા ક્ષીરાબ્ધિમથનોદ્ભવા ।
કૃષ્ણવર્ણા રોગહન્ત્રી ત્રિવર્ણા સર્વકામદા ॥ ૨॥

લક્ષ્મીસખી નિત્યશુદ્ધા સુદતી ભૂમિપાવની ।
હરિદ્રાન્નૈકનિરતા હરિપાદકૃતાલયા ॥ ૩॥

પવિત્રરૂપિણી ધન્યા સુગન્ધિન્યમૃતોદ્ભવા ।
સુરૂપાઽઽરોગ્યદા તુષ્ટા શક્તિત્રિતયરૂપિણી ॥ ૪॥

દેવી દેવર્ષિસંસ્તુત્યા કાન્તા વિષ્ણુમનઃપ્રિયા।
ભૂતવેતાલભીતિઘ્ની મહાપાતકનાશિની ॥ ૫॥

મનોરથપ્રદા મેધા કાન્તિર્વિજયદાયિની ।
શઙ્ખચક્રગદાપદ્મધારિણી કામરૂપિણી ॥ ૬॥

અપવર્ગપ્રદા શ્યામા કૃશમધ્યા સુકેશિની ।
વૈકુણ્ઠવાસિની નન્દા બિમ્બોષ્ઠી કોકિલસ્વરા ॥ ૭॥

કપિલા નિમ્નગાજન્મભૂમિરાયુષ્યદાયિની ।
વનરૂપા દુઃખનાશિન્યવિકારા ચતુર્ભુજા ॥ ૮॥

ગરુત્મદ્વાહના શાન્તા દાન્તા વિઘ્નનિવારિણી ।
શ્રીવિષ્ણુમૂલિકા પુષ્ટિસ્ત્રિવર્ગફલદાયિની ॥ ૯॥

મહાશક્તિર્મહામાયા લક્ષ્મીવાણીસુપૂજિતા ।
સુમઙ્ગલ્યર્ચનપ્રીતા સૌમઙ્ગલ્યવિવર્ધિની ॥ ૧૦॥

ચાતુર્માસ્યોત્સવારાધ્યા વિષ્ણુ સાન્નિધ્યદાયિની ।
ઉત્થાનદ્વાદશીપૂજ્યા સર્વદેવપ્રપૂજિતા ॥ ૧૧॥

ગોપીરતિપ્રદા નિત્યા નિર્ગુણા પાર્વતીપ્રિયા ।
અપમૃત્યુહરા રાધાપ્રિયા મૃગવિલોચના ॥ ૧૨॥

અમ્લાના હંસગમના કમલાસનવન્દિતા ।

ભૂલોકવાસિની શુદ્ધા રામકૃષ્ણાદિપૂજિતા ॥ ૧૩॥

સીતાપૂજ્યા રામમનઃપ્રિયા નન્દનસંસ્થિતા ।
સર્વતીર્થમયી મુક્તા લોકસૃષ્ટિવિધાયિની ॥ ૧૪॥

પ્રાતર્દૃશ્યા ગ્લાનિહન્ત્રી વૈષ્ણવી સર્વસિદ્ધિદા ।
નારાયણી સન્તતિદા મૂલમૃદ્ધારિપાવની ॥ ૧૫॥

અશોકવનિકાસંસ્થા સીતાધ્યાતા નિરાશ્રયા ।
ગોમતીસરયૂતીરરોપિતા કુટિલાલકા ॥ ૧૬॥

અપાત્રભક્ષ્યપાપઘ્ની દાનતોયવિશુદ્ધિદા
શ્રુતિધારણસુપ્રીતા શુભા સર્વેષ્ટદાયિની ॥ ૧૭॥

નામ્નાં શતં સાષ્ટકં તત્તુલસ્યાઃ સર્વમઙ્ગલમ્ ।
સૌમઙ્ગલ્યપ્રદં પ્રાતઃ પઠેદ્ભક્ત્યા સુભાગ્યદમ્ ।
લક્ષ્મીપતિપ્રસાદેન સર્વવિદ્યાપ્રદં નૃણામ્ ॥ ૧૮॥

ઇતિ તુલસ્યષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Shree Devi Kumar
Proofread by Shree Devi Kumar, PSA Easwaran

.. tulasyaShTottarashatanAmastotram ..

Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996

on August 29, 2017

Please send corrections to *sanskrit@cheerful.com*